
# 1. मम विद्यालयः

एषः मम विद्यालयः । मम विद्यालयः अतीव विशालः । अत्र द्वादशश्रेण्यः सन्ति। अस्मिन् विद्यालये सहस्रं छात्राः पठन्ति। शतम् अध्यापकाः अध्यापिकाः च कार्यं कुर्वन्ति। विद्यालयस्य वातावरणम् अतीव आनन्दप्रदम् अस्ति। विद्यालये रसायन–भौतिक– संगणक–विभागाः सन्ति।

अस्माकम् विद्यालये
विशालम्
क्रीडाक्षेत्रम् अस्ति



अस्माकं विद्यालये विशालः पुस्तकालयः अपि अस्ति।

छात्राः प्रातः प्रार्थनां कुर्वन्ति।





ते क्रीडाक्षेत्रे क्रीडन्ति।


केचित् छात्राः कन्दुकेन क्रीडन्ति, केचन च यष्टिकाभिः खेलन्ति अन्ये धावन्ति अपरे च उत्पतन्ति।





पुस्तकालये छात्राः पुस्तकानि तूष्णीम् पठन्ति।

मम विद्यालये ध्वनिमुद्रिका, ध्वनिग्राहकम्, ध्वनिविस्तारकयन्त्रम्, प्रक्षेपण-यन्त्रम्, दूरदर्शन-यन्त्रं कृष्णफलकं च अस्ति।






अस्माकं विद्यालये सुन्दरम् उपवनम् अस्ति।

अत्र अनेकानि पुष्पाणि सन्ति।



मालाकारः उपवनं रक्षति। वयम् उपवने अन्यैः छात्रैः सह पाठं पठामः व्यायामं कुर्मः क्रीडामः च।

# अनुशीलनम्

1. **उत्तरं शुद्धं चेत् 'आम्', अशुद्धं चेत् 'न' इति लिखत।**

    (i) किं तव विद्यालयः विशालः अस्ति? आम्

    (ii) किं चित्रे शिक्षिका चित्रं लिखति? ☐

    (iii) किं पुस्तकालये छात्राः खेलन्ति? ☐

    (iv) किं विद्यालयस्य पुरतः क्रीडाङ्गणम् अस्ति? ☐

    (v) किम् आचार्यः छात्रान् ताडयति? ☐

    (vi) किं केचन बालाः यष्टिकन्दुकैः क्रीडन्ति? ☐

2. **अधोलिखित – प्रश्नानाम् उत्तराणि एकपदेन लिखत।**

    (i) विद्यालयः कीदृशः अस्ति?

    (ii) विद्यालयस्य वातावरणं कीदृशम् अस्ति?

    (iii) विद्यालये कीदृशः पुस्तकालयः अस्ति?

    (iv) उपवने यूयम् अन्यैः छात्रैः सह किं कुरुथ?

    (v) विद्यालये कति छात्राः सन्ति?

3. **पाठं पठित्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि एकेन वाक्येन वदत लिखत च।**

(i) विद्यालये कति श्रेण्यः सन्ति?

(ii) छात्राः कुत्र तूष्णीं पठन्ति?

(iii) विद्यालयस्य उपवनं कः रक्षति?

(iv) शिक्षिका कृष्णफलके किं करोति?

(v) विद्यालये प्रार्थना कदा भवति?

4. **रेखाङ्कित-पदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

(i) विद्यालये संगणक-विभागः अस्ति।

(ii) छात्राः क्रीडाक्षेत्रे क्रीडन्ति।

(iii) विद्यालये उपवनम् अस्ति।

(iv) प्रधानाचार्यः गुणवान् अस्ति।


(v) अध्यापकः छात्रान् न ताडयति।


5. **विपरीतार्थक-पदेन सह मेलनं कुरुत।**

| | क | ख |
|---|---|---|
| (i) | नूतनम् | दुःखम् |
| (ii) | तूष्णीम् | पुरातनम् |
| (iii) | सुखम् | लघुः |
| (iv) | विशालः | उच्चैः |

6. प्रदत्त-चित्रेषु के किं कुर्वन्ति इति वदत लिखत च।










7. किं युष्माकं विद्यालये एतानि वस्तूनि सन्ति?








यथा आम्, अस्ति न अस्ति ..........................






8. अधः प्रदत्तां सारणीं पठत। तदनु समयविषयकं कालांशम् अधिकृत्य प्रदत्तानां प्रश्नानाम् उत्तराणां च मेलनं कुरुत।

| प्रश्नाः | उत्तराणि |
|---|---|
| 1. प्रातः अष्टवादने छात्राः किं कुर्वन्ति? | 1. सार्ध–दशवादने विश्रान्तिवेला अस्ति। |
| 2. सामूहिक–गानं कदा भवति? | 2. पादोन–द्विवादने छात्राः जीवविज्ञानं पठन्ति। |
| 3. संस्कृत–कालांशः कदा अस्ति? | 3. आम् छात्राः सार्धनववादने रसायनशास्त्रं पठन्ति। |
| 4. सार्ध–द्वादशवादने छात्राः किं कुर्वन्ति? | 4. सपादद्विवादने इतिहासस्य कालांशः अस्ति। |
| 5. सार्ध–दशवादने किम् अस्ति? | 5. सामूहिक–गानं सपाद–द्वादशवादने भवति। |
| 6. छात्राः पादोनद्विवादने किं पठन्ति? | 6. त्रिवादने क्रीडासमयः भवति। |
| 7. किं छात्राः पादोन–एकादशवादने भौतिकं पठन्ति? | 7. प्रातः अष्टवादने छात्राः प्रार्थनां कुर्वन्ति। |
| 8. क्रीडासमयः कदा भवति? | 8. सार्धद्वादशवादने छात्राः भोजनं कुर्वन्ति। |
| 9. किं छात्राः सार्ध–नववादने रसायन–शास्त्रं पठन्ति? | 9. आम्, पादोन–एकादशवादने छात्राः भौतिकं पठन्ति। |
| 10. इतिहासस्य कालांशः कदा अस्ति? | 10. संस्कृतकालांशः सार्ध–अष्टवादने अस्ति। |